दिनाङ्क: 17.04.2026

प्रात: - 06:55

## लोकसभा

लोकसभायां ह्य: उरुरात्रिं यावत् विंशति-षड्विंशति-संविधान-विधेयकस्य एकत्रिंशदधिकैकशततमे संशोधने, विंशति-षड्विंशति-परिसीमन-विधेयके, विंशति-षड्विंशति-केन्द्रशासितप्रदेश-विधेयके च चर्चा जाता। एतेषां तिसृणां विधेयकानां उद्देश्यं लोकसभायां राज्याणां केन्द्रशासित-प्रदेशानां च विधानसभासु महिलानां सहभागिताया: वर्धनम् अस्ति। विंशति-त्रयोविंशति-संविधान-अधिनियमस्य षडधिकैकशत-तमे संशोधने, यत् नारी-शक्ति-वन्दन-अधिनियमेन अपि अभिधीयते, लोकसभायां विधानसभासु च महिलाभ्य: प्राय: एकतृतीयांश-आसनानाम् आरक्षणस्य प्रावधानं जातम्। नारी-शक्ति-वन्दन-अधिनियमं लोकतांत्रिक-राजनीतौ महिलानाम् अधिकाधिकं सहभागित्वं सुनिश्चेतुम् आसीत्। एतानि त्रीणि विधेयकानि क्षेत्रीयनिर्वाचनक्षेत्राणां परिसीमां सौविध्यपूर्णकर्तुं लोकसभायां विधानसभासु च महिलाभ्य: तृतीयांश-आसनानां आरक्षणस्य प्रावधानानां कार्यान्वयनाय च सन्ति।

## सिक्किमम

सिक्किमराज्ये नारी-शक्ति-वन्दन-अधिनियम-महिलासभा अद्य प्रात: गङ्गटोक-नगरे आयोजयिष्यते। अस्या: आयोजनं राज्यस्य प्रमुखमहिलाभि: प्रधानमन्त्रिणं नरेन्द्रमोदिनं प्रति कृतज्ञतां प्रकटयितुं भवति। इयं सभा देवराली इत्येतस्मात् स्थलात् आरभ्य पलजोर-प्राङ्गणात् यावत् प्रचलिष्यति। राज्यस्य नैका: प्रमुखमहिला: अद्य अस्यां सभायां भागं ग्रहीष्यन्ति इति आशास्यते।

## ऑस्ट्रिया-पीएम

प्रधानमन्त्री नरेन्द्रमोदी ह्य: नवदिल्ल्यां ऑस्ट्रियादेशस्य चांसलर-इति पदासीनेन डॉ.क्रिश्चिन् स्टॉकर इत्यनेन सह संवादं कृतवान्। उपवेशनावधौ भारत-ऑस्ट्रियादेशयो: मध्ये खाद्यसुरक्षायाम् एकं सहमतिज्ञापनं, सैन्यप्रकरणेषु सहयोगे एकम् आशयपत्रं, आतङ्कवादं विरुध्य संयुक्तकार्यसमूहे एकम् आशयपत्रं च समेत्य नैकासां सहमतिपत्राणाम् आदानप्रदानं जातम्। संयुक्तवार्ताहरसम्मेलनं सम्बोधयन् प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् भारतास्ट्रिया-देशौ आधारभूत-संरचनायां, नवाचारे, स्थिरतायां च क्षेत्रे विश्वसनीय-सहभागिनौ स्त:।

<u>गोयल-साउथ कोरिया</u>

वाणिज्योद्योग-मन्त्री पीयूष-गोयल: ह्य: दक्षिण-कोरियादेशस्य व्यापारमन्त्रिणा यो हान् कू इत्येतेन सह आभासीयमाध्यमेन उपवेशनम् अकरोत्। सामाजिक-सञ्चार-पटले एकस्मिन् सन्देशे गोयल: कथितवान् यत् उपवेशनावधौ द्वौ नेतारौ भारत-दक्षिणकोरिया-देशयोर्मध्ये द्विपाक्षिकार्थिक-सहयोगं सुदृढीकरणे चर्चां कृतवन्तौ।

<u>ट्रम्प-ईरान</u>

अमेरिकाया: राष्ट्रपति: डोनाल्ड् ट्रम्प् प्रतिपादितवान् यत् ईरानदेश: स्वस्य संवर्धितं यूरेनियम-धातुं प्रदातुं सज्ज: अस्ति, यस्य प्रयोग: परमाणुशस्त्रनिर्माणार्यं भवति स्म। ट्रम्प् व्हाइट हाउस इत्यत्र वार्ताहरान् संसूचयन् अवदत् यत् द्वौ देशौ शान्ति-सन्धे: समीपे स्त: ।

<u>आईपीएल</u>

आई.पी.एल. इति क्रिकेट्-प्रतिस्पर्धायां ह्य: रात्रौ मुम्बय्या: वानखेडे-क्रीडाङ्गणे पञ्जाब-किङ्ग्स-दलेन मुम्बई-इण्डियन्स्-दलं सप्तस्तौभै: पराजितम्।